CS(M) EXAM2012

Sl. No.

G-DTN-M-TLSA

# SANSKRIT
## Paper I
### (Literature)

*Time Allowed : Three Hours* | *Maximum Marks : 300*

## INSTRUCTIONS

*Candidates should attempt Question Nos. **1** and **5** which are compulsory, and any **three** of the remaining questions, selecting at least **one** question from each Section.*

*The number of marks carried by each question is indicated at the end of the question.*

*Question Nos. **1**, **5** and **8** must be answered in Sanskrit and the remaining questions must be answered either in Sanskrit or in the medium of examination specified in the Admission Certificate issued to you.*

*Answers written in Sanskrit must be in Devanāgarī script*

***Important : Whenever a Question is being attempted, all its parts/sub-parts must be attempted contiguously. This means that before moving on to the next Question to be attempted, candidates must finish attempting all parts/sub-parts of the previous Question attempted. This is to be strictly followed.***

*Pages left blank in the answer-book are to be clearly struck out in ink. Any answers that follow pages left blank may not be given credit.*

## Section 'A'

**1.** अधोलिखिताः सर्वे प्रश्नाः **संस्कृतेन** समाधेयाः । 1×3=3

(a) (i) यण्-प्रत्याहारगता वर्णा लेखनीयाः ।

(ii) का लघु-संज्ञा ? (सूत्रं देयम्)

(iii) वाच्यपरिवर्तनं कर्तव्यम् —

शिष्यो गुरुं सेवते ।

(b) अधोनिर्दिष्टानां सूत्रोल्लेखपूर्वकं संधिकार्यं संधिविच्छेद-कार्यं वा साधनीयम् । 2×4=8

(i) यद्यपि

(ii) कैषा

(iii) ऋषी + इमौ

(iv) वाक् + एव

(c) अधोदत्तेषु वाक्येषु रेखाङ्कितपदानां विभक्तिप्रयोगस्य याथार्थ्यं सूत्रोल्लेखपूर्वकं निर्णेयम् । 4×5=20

(i) <u>वपुषा</u> षडाननः कार्तिकेयः ।

(ii) <u>कवीनां</u> रवीन्द्रनाथः ।

(iii) <u>पुस्तकाय</u> ग्रन्थालयं गच्छ ।

(iv) <u>सर्पाद्</u> भीतो मरणं गतः ।

(v) <u>जलाद्</u> जायन्ते घातका मशकाः ।

(d) अधोलिखितानां वाक्यानां समासो विधीयताम्; समासनामापि लिख्यताम् । 3×5=15

(i) काव्यं करोति यः सः

(ii) नखाश्च दन्ताश्च ।

(iii) रक्तमुत्पलम् ।

(iv) चतुर्णां पदानां समाहारः ।

(v) चन्द्रेण आहतः ।

(e) अधोलिखितानां सूत्राणामर्थोदाहरणानि प्रदेयानि —

$4 \times 3\frac{1}{2} = 14$

(i) आदिरन्त्येन सहेता ।

(ii) एचोऽयवायावः ।

(iii) अदसो मात् ।

(iv) कर्त्तृकर्मणोः कृति ।

2. (a) वैदिके वाङ्मये उपसर्गाणां प्रयोगवैशिष्टं सोदाहरणं निरूपणीयम् । 30

(b) लौकिकसंस्कृते संधिप्रक्रियामवलम्ब्य ध्वनितात्त्विक-मालोचनं, ध्वनिपरिवर्तनव्याख्यानं च प्रस्तूयताम् । 30

3. (a) भासकृतानि एकाङ्कानि नाट्यानि अवलम्ब्य नातिदीर्घो निबन्धो विरच्यताम् । 30

(b) कालिदासकृतस्य महाकाव्यद्वयस्य काव्यविमर्शो विधीयताम् । 30

4. (a) माघे सन्ति त्रयो गुणाः । — के ते गुणा इति समुल्लिख्य उक्तेरस्या आशयः सदृष्टान्तं स्फुटीकरणीयः । 30

(b) काव्यं ग्राह्यमलंकारात् । सौन्दर्यमलंकारः ।
— सोदाहरणं विस्पष्टीक्रियतामिदं वचनद्वयम् । 30

## Section 'B'

5. अधोलिखितेषु यथाकामं **विषयद्वयमवलम्ब्य सुरगिरा** नागराक्षरैश्च प्रत्येकं 175-पदपरिमितं निबन्धद्वयं विरच्यताम् । 30+30=60

Write *two* essays in Sanskrit in about 175 words each taking any *two* of the topics given below : (Write in Devanagari script only). 30+30=60

(a) स्त्रीजातेः शक्तिवर्धनार्थं प्रस्तावः ।

(b) स्वामि-विवेकानन्दस्य विवेकवाण्याः सामाजिकम् उपयोगित्वम् ।

(c) राजनीतौ दुर्वृत्तानां प्रवेशो लोकतन्त्रवाधकः ।

(d) जातिधर्मानुसारेण विद्यायतने नियोगे च संरक्षणविधेः समीचीनता ।

(e) शिक्षां विना जनानां न्यायाधिकारसाम्यं दुर्लभम् ।

6. (a) अद्यतने भारतीये समाजे स्मार्तसंस्काराणां कोपयोगितेति विशद्यताम् । 30

(b) भारतीये समाजेऽद्यापि प्रचलिता पुराण-प्रवचन-कला व्याख्यायताम् । 30

7. (a) श्रीमद्भगवद्गीतायां प्रतिपादितो ज्ञानकर्मयोगो विस्पष्टीक्रियताम् । 30

(b) योग-शब्दस्य तात्पर्यं सम्यग् व्याख्याय अष्टाङ्गिको योगो वैशद्येन प्रतिपाद्यताम् । 30

8. (A) अधोलिखितं संदर्भं सम्यगवधार्य तदधस्तात् प्रदत्तानां प्रश्नानामुत्तरं कार्यं **सुरगिरा नागराक्षरैश्च** । 5×6=30

Read the following passage carefully and answer the questions given below in Sanskrit and write *in Devanagari script only*. Answers must be in your own words. 5×6=30

द्रोणेन चक्रव्यूहे निर्मिते युधिष्ठिरश्चिन्तया व्याकुलो जातः । अर्जुनेन विना नापरः कोऽपि जानाति चक्रव्यूहभेदकर्म । स च व्यापृतः संशप्तक-नामक-संग्रामे । तर्हि का गतिः ? इत्थं चिन्ताकुले युधिष्ठिरे अभिमन्युर्युधिष्ठिरमुपगम्य चिन्ताकारणं जानाति स्म । ज्ञात्वा चाह — ज्येष्ठतात ! अहं चक्रव्यूहं भेत्स्यामि । अहं गर्भस्थ एव चक्रव्यूहस्य भेदोपायं पितुः सकाशादशिक्षे । वाचमिमां श्रुत्वा नृपतिर्युधिष्ठिरः स्वस्थोऽभवत् । किन्तु तस्य चित्तमभिमन्योरमङ्गलाशङ्कया अन्तरा अन्तरा कम्पितुमारेभे । तथापि न कापुरुषत्वं परन्तु वीरत्वमेव क्षात्रधर्म इति मत्वा तदाशङ्कातः प्रतिनिवृत्तः । अथ तत्रभवान् अभिमन्युं चक्रव्यूहसंग्रामे सेनापतिपदे स्थापितवान् ।

(a) कस्य युद्धस्य विषये अयं कथांशः ? कुत्रेदं युद्धं संघटितम् ? कस्मिन् मूलग्रन्थे उपलब्धोऽयं वृत्तान्तः ?

(b) कीदृशो बलविन्यासोऽत्र वर्णितः ? केन स निर्मितः । किं वा तस्य फलमत्रोक्तम् ?

(c) अर्जुनः कतमः पाण्डवः ? स कुत्र व्यापृतः ? तस्य किं विशेषज्ञानमासीत् ?

(d) कोऽभिमन्युः ? स कस्मिन् विषये स्वकीयं ज्ञानं कस्मै निवेदितवान् ? कथं स इदं प्राप्तवान् ? का तस्य जननी ?

(e) कति पाण्डवपक्षीया अस्मिन् ग्रन्थांशे उल्लिखिताः ? कोऽत्र ज्येष्ठः ? किं तस्य चिन्ताकारणम् ?

(f) क्षात्रधर्म-पदं व्याख्याय, तद्विषये अत्र यदुक्तं तदुल्लेख्यम् । अन्ततः कः सेनापतिपदे वृतः ?

(B) अधोलिखितं संदर्भं सम्यगवधार्य तदधस्तात् प्रदत्तानां प्रश्नानामुत्तरं स्वभाषायां सुरगिरा नागराक्षरैश्च प्रदेयम् । 5×6=30

Read the following passage carefully and answer the questions given below in Sanskrit and write *in Devanagari script only*. Answers must be in your own words. 5×6=30

विश्वम्भराभरणभूतस्यास्य भारतवर्षस्य नायकमणिरिव स्थितो वत्सदेशो महासमृद्धिशाली । हृदयमिवासौ भवति महामहिमशाली सकलभूमण्डलस्य । सकलभुवनभरणकर्त्तुः भगवतो भास्करस्य दुहितृभूता भगवती कालिन्दी स्वयमेवैनं देशं पीयूषभरीभिर्लहरीभिः सिञ्चन्ती धनधान्यसमृद्धं विदधाति । जगद्वन्दनीया कौशाम्बी राजधानी चास्य सकलजनानुरञ्जनी ।

पञ्चशताधिकद्विसहस्रवर्षपूर्वस्मिन् काले नगरीयं प्रधानीभूता सकलधरणीमण्डलनगरीणाम्। प्रमुखं च केन्द्रमासीदियं वीरतायाः, विद्यायाः, राजनीतेर्वाणिज्यस्य च। प्रसृता यशः सुरभिः दशसु दिक्षु वत्सदेशाधीश्वराणां वीरतायाः, राजनीतिनिपुणतायाः, प्रजावत्सलतायाश्च। कौशाम्बीवर्तिषु-विद्याकेन्द्रेष्वध्ययनमेव स्नातकोपाध्यलं-कृतिभाजनत्वं च विदुषां परं सम्माननीयमासीत् सकलभुवनतले। सकलधरणीतलवर्तिव्यापारकेन्द्रेभ्यः सार्थवाहाः समागत्य स्वकीयानि विक्रेयवस्तून्यादायास्यां नगर्यां वाणिज्य-माध्यमेनास्याः परां समृद्धिं वर्द्धयन्ति स्म।

(a) कीदृश आसीत् वत्सदेशः ?

(b) कालिन्दी कस्य पुत्री आसीत् ?

(c) कौशाम्ब्याः वैभवं गौरवञ्च कीदृशमासीत् ?

(d) तत्रत्यानां विद्यालयानां स्वरूपं वर्ण्यताम् ?

(e) विदेशीयाः सार्थवाहाः तत्र किमर्थमागच्छन्ति स्म ?

(f) वत्सदेशराजानः किमर्थं प्रसिद्धाः आसन् ?